Ṛṣhabha Sūktam

[RV S 10-166 (Kāñchī Pāṭhaḥa)]

ॐ ऋ॒ष॒भं मा॑ समा॒नानां॑ स॒पत्ना॑नां विषास॒हिम् ।

ॐ ṛṣhabham' māā samānānāāṁ'

sapat'nāānāṁ' viṣhāsahim ।

ह॒न्तारं॒ शत्रू॑णां कृधि वि॒राजं॒ गोप॑तिं॒ गवा॑म् ॥ १ ॥

han'tāraṁ' śhat'rūūṇāṅ'

kṛdhi virājaṅ' gōpa-tiṅ' gavāām ॥ 1 ॥

अ॒हम॑स्मि सपत्न॒हेन्द्र॑ , इ॒वारि॑ष्टो॒ , अक्ष॑तः ।

ahamas'mi sapat'nahēn'dra- , ivāriṣh'ṭō , ak'ṣha-taḥa ।

अ॒धः स॒पत्ना॑ मे प॒दोरि॒मे सर्वे॑ , अ॒भिष्ठि॑ताः ॥ २ ॥

adhas' sapat'nāā mē padōrimē

sar'vēē , abhiṣh'ṭhi-tā-ḥa ॥ 2 ॥

अत्रै॒व वोऽपि॑ नह्याम्यु॒भे , आर्त्नी॑ , इव॒ ज्यया॑ ।

at'raiva vō (a)pi- nah'yām'yubhē , ār'tnīī , ivaj' jyayāā ।

वाच॑स्पते॒ नि षे॑धे॒मान् यथा॒ मदध॑रं॒ वदा॑न् ॥ ३ ॥

vāchas'patē ni ṣhēēdhēmān'

yathā madadha-raṁ' vadāāne ॥ 3 ॥

अ॒भि॒भूर॒हमाग॑मं वि॒श्वकर्म्॑मेण॒ धाम्ना॑ ।

abhibhū rahamāga-maṁ'

viśh'vakarm'm'mēṇa dhām'nāā ।

www.Sai-Veda.net

आ वश्चित्तमा वौं व्रतमा वोऽहं समितिं ददे ॥ ४॥

ā vaśh'chit'tamā vōōv'
vratamā vō (a)haṁ' samī-tin' dadē ॥ 4 ॥

योगक्षेमं व , आदायाहं भूयासमुत्तम , आ वौं मूर्धानमक्रमीम् ।

yōgaak'ṣhēmaṁ' va- , ādāyāham' bhūūyāsamut'tama ,
ā vōō mūr'dhāna-mak'ramīm ।

अधस्पदान्म , उद्वदत मण्डूकाँ, इवोदकान् मण्डूकाँ, उदकादिव ॥ ५॥

adhaas'padān'ma , ud'va-data maṇ'ḍūkāā ,
ivōdakān' maṇ'ḍūkāā , udakādi-va ॥ 5 ॥

ॐ शान्तिः शान्तिः शान्तिः ॥

ॐ śhā-n'tiśh' śhā-n'tiśh' śhā-n'tiḥi ॥

www.SaiVeda.net

Ṛṣhabha Sūktam

[RV S 10-166 (Śhṛṅgērī Pāṭhaḥa)]

ॐ ऋ॒ष॒भं मा॑ समा॒नानां॑ स॒पत्ना॑नां विषास॒हिम् ।

ॐ ṛṣhabham' māā samānānāāṁ'

sapat'nāānāṁ' viṣhāsahim ।

ह॒न्तारं॒ शत्रू॑णां कृधि वि॒राजं॒ गोप॑तिं॒ गवा॑म् ॥ १ ॥

han'tāraṁ' śhat'rūūṇāṅ'

kṛdhi virājaṅ' gōpatiṅ' gavāām ॥ 1 ॥

अ॒हम॑स्मि सपत्न॒हेन्द्र॑ , इ॒वारि॑ष्टो॒ , अक्ष॑तः ।

ahamas'mi sapat'nahēn'dra , ivāriṣh'ṭō , ak'ṣhataḥa ।

अ॒धः स॒पत्ना॑ मे प॒दोरि॒मे सर्वे॑ , अ॒भिष्ठि॑ताः ॥ २ ॥

adhas' sapat'nāā mē padōrimē

sar'vēē , abhiṣh'ṭhitā-ḥa ॥ 2 ॥

अत्रै॒व वोऽपि॑ नह्याम्यु॒भे , आर्त्नी॑ , इव॒ ज्यया॑ ।

at'raiva vō (a)pi nah'yām'yubhē , ār'tnīī , ivaj' jyayāā ।

वाच॑स्पते॒ नि षे॑धे॒मान् यथा॒ मदध॑रं॒ वदान्॑ ॥ ३ ॥

vāchas'patē ni ṣhēēdhēmān'

yathā madadharaṁ' vadāne ॥ 3 ॥

अ॒भि॒भूर॒हमाग॑मं वि॒श्वकर्॑मेण॒ धाम्ना॑ ।

abhibhū rahamāgamaṁ'

viśh'vakar'r'mēṇa dhām'nāā ।

www.SaiVeda.net

आ वश्चित्तमा वौं व्रतमा वोऽहं समितिं ददे ॥ ४॥

ā vaśh'chit'tamā vōōv'

vratamā vō (a)haṁ' samitin' dadē ॥ 4 ॥

योगक्षेमं व , आदायाहं भूयासमुत्तम , आ वौं मूर्धानमक्रमीम् ।

yōgaak'ṣhēmaṁ' va , ādāyāham' bhūūyāsamut'tama ,

ā vōō mūr'dhānamak'ramīm ।

अधस्पदान्म , उद्वदत मण्डूकाँ, इवोदकान् मण्डूकाँ, उदकादिव ॥ ५॥

adhaas'padān'ma , ud'vadata maṇ'ḍūkāā ,

ivōdakān' maṇ'ḍūkāā , udakādiva ॥ 5 ॥

ॐ शान्तिः शान्तिः शान्तिः ॥

ॐ śhā-n'tiśh' śhā-n'tiśh' śhā-n'tiḥi ॥

www.SaiVeda.net